National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(67): 170-172
© 2026 NJHSR
www.sanskritarticle.com

**सिलिस्वप्रासाहुः**
अनुसन्धात्री, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः,
आन्ध्रप्रदेशः- 517507

**Correspondence:**
**सिलिस्वप्रासाहुः**
अनुसन्धात्री, साहित्यविभागः,
राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः,
आन्ध्रप्रदेशः- 517507

# ललितलवङ्गलतायामङ्गिरसत्वेन भक्तिरसपरिशीलनम्

**सिलिस्वप्रासाहुः**

**सारांशः (Summary)** प्रस्तुतशोधनिबन्धे व्रजमोहनमहान्तिमहोदयेन विरचिते 'ललितलवङ्गलता' इत्याख्ये उपन्यासे रससिद्धान्तानुगुणं भक्तिरसस्य अङ्गीरसत्वं सप्रमाणं प्रतिपादितम्। भक्तिशास्त्रदृष्ट्या 'भगवद्विषयिणी रतिः' एव अस्य ग्रन्थस्य स्थायी भावः। महाकवेः जयदेवस्य, पद्मावत्याः, विक्रमदेवशर्मणः, मालिन्याः तुलस्याः, अहम्मदवेगस्य च चरित्रेषु अलौकिकभगवद्रतेः पराकाष्ठा दृश्यते। श्रीजगन्नाथ-राधामाधव-तारातारिणीप्रभृतयः विषयालम्बनाः, श्रीक्षेत्र-नीलचक्रादयः उद्दीपनाः, जयदेवस्य प्रेमाश्रु-रोमाञ्चादयः अनुभावाः, तथा निर्वेदादयः व्यभिचारिभावाः मिलित्वा रसनिष्पत्तिं कुर्वन्ति। अत्र समुल्लसिताः शृङ्गार-करुण-शान्तादयः रसाः स्वतन्त्राः न भूत्वा अङ्गीरसस्य भक्तिरसस्यैव (विशिष्टतया मधुरभक्तेः) पोषणं कुर्वन्ति। अन्ते च जयदेवस्य भगवति सायुज्यप्राप्तिः 'रसो वै सः' इति उपनिषद्वाक्यं चरितार्थयन्ती भक्तिरसस्य सर्वोत्कर्षं साधयति ।

**कूटशब्दाः –** ललितलवङ्गलता, अङ्गिरसः, भक्तिरसः, भगवद्रतिः, रूपगोस्वामी, निष्कामरतिः, ह्लादिनीशक्तिः, नवधाभक्तिः, मधुरभक्तिः, व्रजमोहनमहान्तिः।

**ललितलवङ्गलतायाः तत्कर्त्तुश्च परिचयः -** भारतीयकाव्यसाम्रज्यमतीव विस्तृतं भवति । वैदिकाः महर्षयः छन्दोबद्धपद्यैः नैकानि ऋचः रचितवन्तः, यत्र तात्कालिकसमाजस्य आध्यात्मिकचेतनायाः परिप्रकाशः दृश्यते । ततः परम् उपनिषदः, स्मृतिग्रन्थः, पुराणानि, रामायणम्, महाभारतम्, काव्यानि च विविधप्रकारकाणि रचितानि। एतेषु सर्वेष्वपि वाङ्मयेषु सामाजिकसिद्धान्तैः सहः हृदयाह्लादकरससौन्दर्यं छन्दोविच्छित्तिः, अलङ्कारविन्यासः इत्यादयः प्रस्फुटितास्सन्तः रमणीयतां भजन्ते। सामान्यतया आधुनिककाव्यानां भेदाः दृश्य-श्रव्य-कथा-नाटक-आख्यायिका-महाकाव्य-खण्डकाव्यादिरूपेण प्राप्यन्ते। तत्र गद्यकाव्यप्रकारेण कथा तथा आख्यायिका इति भेदद्वयं प्रसिद्धमस्ति । कादम्बरी, दशकुमारचरितम्, शिवराजविजयमित्यादीनि गद्यकाव्यानि अत्र उल्लेखनीयानि सन्ति । तेषु 'ललितलवङ्गलता" इति उपन्यासः स्वतन्त्रं स्थानं भजते । संस्कृतभाषया रचितः अयमुपन्यासः मूलतः ओडिआभाषायाः रूपान्तरितः अनूदितः ग्रन्थः। श्रीयुक्तव्रजमोहनमहान्ति-महोदयाः अस्य ओडिआ-उपन्यासस्य लेखकाः आसन् ।

**भक्तितत्त्वविमर्शः -** भज्-सेवायामिति धातोः क्तिन् प्रत्यये निष्पन्नोऽयं भक्तिशब्दः भगवतः सेवायां तत्परतागुणं द्योतयति । एषा सेवा अहैतुकी निष्कामा स्यादित्युच्यते पण्डितैः । मनसा वाचा कर्मणा सर्वसमर्पणभावनया भगवति आत्मसमर्पणमेव भक्तिरित्युच्यते । त्रितापदग्धः मनुष्यः सदैव मुक्तिकामो भवति । तदर्थं भागवते त्रीणि साधनानि प्रोक्तानि । यथा - निष्कामकर्मानुष्ठानम्, ज्ञानम्, भक्तिश्चेति । तथोक्तम् -

**योगास्त्रयो मया प्रोक्ता नृणां श्रेयो विधित्सया ।**
**ज्ञानं कर्म च भक्तिश्च नोपायोऽन्योऽस्ति कुत्रचित् ।।**[1]

भक्तिमार्गे मोक्षेप्सुः भगवतः नामोच्चारयन्, रूपं चिन्तयन्, सर्वविधाम् अलौकिक- लीलामाकर्णयन्, भगवति समासक्तो भूत्वा मुक्तिं प्राप्नोति । तथा चोक्तं श्रीमद्भागवते -

**शृण्वन् गृणन् संस्मरंश्च चिन्तयन्**
**नामानि रूपाणि च मङ्गलानि ते**
**क्रियासु यस्त्वच्चरणारविन्दयो-**
**राविष्टचेता न भवाय कल्पते ।।**[2]

पुनश्च तत्रोच्यते –

**मद्गुणश्रुतिमात्रेण मयि सर्वगुहाशये ।**
**मनोगतिरविच्छिन्ना यथा गङ्गाम्भसोऽम्बुधौ ।।**
**लक्षणं भक्तियोगस्य निर्गुणस्य ह्युदाहृतम् ।**
**अहैतुक्यव्यवहिता या भक्ति: पुरुषोत्तमे ।।**[3]

नारदीयभक्तिसूत्रे भक्ते: स्वरूपमित्थं वर्तते – **'सा त्वस्मिन् परमप्रेमरूपा'**[4] इति । अर्थात् परमेश्वरे परमं प्रेमैव भक्तिरित्युच्यते। शाण्डिल्यभक्तिसूत्रे – **'ईश्वरं प्रति परमानुराग एव भक्तिर्निगदिता'**[5] इति भक्तेर्लक्षणमुच्यते । भक्तिरसायने उच्यते –

**द्रुते चित्ते प्रविष्टा या गोविन्दकारतास्थिरा ।**
**सा भक्तिरित्यभिहिता विशेषस्त्वधुनोच्यते ।।**[6]

रूपगोस्वामिना भक्तिरसामृतसिन्धौ उच्यते –

**अन्याभिलाषिताशून्या ज्ञानकर्माद्यनावृतम् ।**
**आनुकूल्येन कृष्णानुशीलनं भक्तिरुत्तमा ।।**[7] इति ।

कृष्णे अहैतुकभक्ति: भावानां प्रकटनेन भवति। एत एव भावा: अनुभावा इत्युच्यन्ते । ते अनुभावा: रूपगोस्वामिन: कथनानुसारं - क्षान्ति:, अव्यर्थकालता, विरति:, मानशून्यता, आशाबन्ध:, समुत्कण्ठा, नामसंकीर्तनरुचि:, श्रीकृष्णे आसक्ति:, श्रीकृष्णस्य लीलान्तरेषु प्रीतिश्च भवन्ति। एवमेते अनुभावा: मुमुक्षूणां हृदये सम्भवन्ति ।

भक्तौ रतिरेव स्थायी भावो भवति । सकामरति: भाव इत्युच्यते। निष्कामरतिश्च रस: । प्रथमत: सामान्यरति: लौकिकीप्रेयसीप्रेययो: परस्परप्रेमावस्थाया: चित्तवृत्ति:। इयं च रति: काव्यरसराजस्य शृङ्गारस्य स्थायी भवति। स एव भगवद्विषयको भवति चेत् भक्तिरसस्य स्थायी भवति । तत: भगवत: प्रेम सञ्जायते । प्रेम्ण: प्रणय उत्पद्यते । प्रणयान्मान उपजायते। मानात्स्नेह: सम्भवति । स्नेहाद्राग: सञ्जायते। रागाद् अनुरागो भवति। अनुरागात् महाभाव:, महाभावाच्च राधातत्त्वं समुत्पद्यते। इदमेव राधातत्त्वं ह्लादिनी शक्ति: । ह्लादिनी एव भगवत: स्वरूपशक्ति:। एवं भगवत्तत्त्वं क्रमश: ह्लादिनीशक्तिमाध्यमेनैव रसरूपेण परिणमते । अत: भगवत: स्वरूपं तैत्तिरीयोपनिषदि उक्तं – **'रसो वै स:, रसं ह्येवायं लब्ध्वाऽऽ-नन्दीभवति'**[8] इति ।

**भक्तिभेद: –** भक्ति: नवधा भवति । श्रीमद्भागवतस्य सप्तमस्कन्धे पञ्चमाध्याये भक्तराजप्रह्लादेनोच्यते –

**श्रवणं कीर्त्तनं विष्णो: स्मरणं पादसेवनम्।**
**अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्।।**[9]

एतेषां सर्वेषां भक्तीनामुदाहरणभूत: श्लोकोऽयं वर्तते यत् -

**श्रीविष्णुश्रवणे परीक्षिदभवद्वैयासिक: कीर्तने**
**प्रह्लाद: स्मरणे तदङ्घ्रिभजने लक्ष्मी: पृथु: पूजने।**
**अक्रूरस्त्वभिवन्दने कपिपतिर्दास्येऽथ सख्येऽर्जुन:**
**सर्वस्वात्मनिवेदने बलिरभूत्कृष्णाप्तिरेषां फलम्।।**

नारदभक्तिसूत्रे भक्तिस्त्रिधा विभक्ताऽस्ति। यथा – गौणी भक्ति:, परा भक्ति:, प्रेमभक्तिश्चेति। तत्र प्रेमभक्तिरेकाऽपि एकादशधा विभक्ता वर्तते । यथा –

(१) गुणमाहात्म्यासक्ति: (२) रूपासक्ति:
(३) पूजासक्ति: (४) स्मरणासक्ति:
(५) दास्यासक्ति: (६) सख्यासक्ति:
(७) वात्सल्यासक्ति: (८) कान्तासक्ति:
(९) आत्मनिवेदनासक्ति: (१०) तन्मयासक्ति:
(११) परमविहारासक्तिश्चेति ।

**ललितलवङ्गलतायां भक्तरसास्वाद: तस्याः अङ्गित्वञ्च –** 'ललितलवङ्गलता' इत्याख्ये उपन्यासे भक्तिरसः एव 'अङ्गी रसः' (मुख्यरसः) वर्तते ।

**स्थायिभावस्य विश्लेषणम् -** भक्तिरसस्य स्थायी भावो भक्ति 'भगवद्विषयिणी रतिः'। अयं कैश्चिदालङ्कारिकै: 'भाव:' इत्यप्युच्यते। उपन्यासस्य नायकः श्रीजयदेवः आदितः अन्तं यावत् विष्णोरनुरागे निमग्नः दृश्यते। तस्य जीवनस्य सर्वेऽपि व्यापाराः (यथा गीतगोविन्दस्य रचना, पद्मावत्या सह सम्बन्धः च) भगवत्प्रीत्यर्थमेव सन्ति। यदा रतिः लौकिकविषयान् परित्यज्य ईश्वराभिमुखी भवति, तदा सा भक्तिरसत्वं प्राप्नोति । प्रकृते काव्ये तदेव आमूलान्तं दृश्यते ।

**विभाव-अनुभाव-व्यभिचारिभावानां समन्वयः -** नाटिकायां भक्तिरसस्य सामग्री प्रतिस्तरं प्रतिपदं प्राप्यते। श्रीविष्णुः, जयदेवः, विक्रमदेवशर्मा, पार्वती, पद्मावती, मालाकारिणी तुलसी, तन्तुवायः, जयदेवस्य पिता भोजदेव: (माधवसेवक:) इत्यादीनि चरित्राणि आलम्बनविभावा: भवन्ति । पुरीक्षेत्रे श्रीजगन्नाथ:, जयदेवस्य कुटीरे राधामाधवविग्रहः, अर्धाशपुरे माधवमूर्त्तिः, ऋषिकूल्यातटे तारातारिणीदेव्यौ अत्र विषयालम्बनत्वेन परिकल्पिताः । अन्ते वृन्दावनस्य श्रीकृष्णोऽपि जयदेवस्य 'नेत्रदीप:' इति वर्ण्यते ।

तथैव श्रीक्षेत्रस्य (पुरी) पावनवातावरणम्, श्रीमन्दिरस्य नीलचक्रम्, वाङ्कीमुहाणीतटम्, वसन्तोत्सवः तारातारिणीमन्दिरस्य पावन-वातावरणम् इत्यादय: उद्दीपनविभावा: भवन्ति। तुलस्या: गीतगोविन्दगानकथा, जगन्नाथबलभद्रयो: शिशुरूपेण पद्मावत्या: कुटीरं प्रति समागम: इत्यादय: विषया: अपि भक्तिरसस्य स्थायिभावं भगवद्रतिम् उद्दीपयन्ति ।

जयदेवस्य रोमाञ्चः, अश्रुपातः, नामसंकीर्तने रुचिः, तथा विक्रमदेवस्य समाधिस्था अवस्था इत्यादय: अत्र अनुभावा: सन्ति । निर्वेदः, दैन्यम्, मतिः, धृतिः, स्मृतिश्चेति व्यभिचारिण: प्रतिस्तरम् अनुभूयन्ते। एतेषां सर्वेषामपि संयोगाद् भगवद्रति: स्थायी भाव: भक्तिरसत्वेन परिणत: सहृदयै: आस्वाद्यते। एतदास्वादनञ्च मुख्यनायक-मुख्यनायिका-मुख्यकथावस्तुषु काव्यारम्भात् शेषं यावत् भवति। यद्यपि अत्र शृङ्गारः तथा करुणरसः अपि स्तः, किन्तु तौ स्वतन्त्रौ न भूत्वा भक्तिरसस्य पोषकौ एव भवत:। जयदेवपद्मावत्योः प्रेम न केवलं काममूलकम्, अपितु 'राधाकृष्णयो:' अलौकिकदाम्पत्यस्य प्रतिविम्बम् अस्ति । अतः अत्र शृङ्गारः 'मधुरभक्तिरसस्य' अङ्गरूपेण वर्तते। विक्रमदेवस्य परिवारस्य कष्टानि अथवा जयदेवस्य विरहव्याकुलता करुणरसं सृजति, किन्तु सा व्याकुलता अन्ते भगवत्प्राप्तौ एव पर्यवस्यति ।

रूपगोस्वामिनः कथनानुसारम् 'अन्याभिलाषिताशून्यम् आनुकूल्येन कृष्णानुशीलनम् भक्तिरुत्तमा'। उपन्यासे सर्वे मुख्याः भक्ताः (तुलसी, विक्रमदेवः, जयदेवः च) सांसारिकसुखं न वाञ्छन्ति। अहम्मदवेग-सदृशानि पात्राणि अपि भगवतः ऐश्वर्यं दृष्ट्वा भक्तिरसेन प्रभाविताः भवन्ति, येन अस्य रसस्य व्यापकता सिद्ध्यति ।

उपन्यासस्यान्ते जयदेवस्य 'तन्मयासक्तिः' पराकाष्ठां प्राप्नोति । यदा सः 'प्रिये पद्मे !' इति आह्वयन् शून्यतायां निलीयते, तदा सः 'रसो वै सः' इति उपनिषद्वाक्यं चरितार्थं करोति। सायुज्यमुक्तिः अथवा भगवति एकाकारिता एव अस्य रसस्य अन्तिमं फलम्। अतः विषयाश्रययोः दिव्यत्वात्, संकीर्तनादिसाधनानां प्राचुर्यात्, अन्ते च भगवत्प्राप्तेः वर्णनात् 'ललितलवङ्गलता'काव्ये भक्तिरसः एव अङ्गी रसो वर्तते। अन्ये सर्वे रसाः (शृङ्गार-करुण-शान्तादयः) तस्यैव परिपोषं कुर्वन्ति ।

**उपसंहारः -** एवं प्रकृतेऽस्मिन् उपन्यासे ललितलवङ्गलातयां प्रधान: रसो भवति 'भक्ति:'। श्रीकृष्णं प्रति श्रीजयदेवस्य अहैतुकी भक्तिरेव प्रतिस्तरमत्र वर्ण्यते। भगवद्भक्तयो: अपूर्व: सम्बन्ध: अत्र चित्रितोऽस्ति। विपत्तौ अपि भगवत: करुणया विपन्मुक्ति: कथायामस्यां प्रदर्श्यते । ये ये रसा: शृङ्गारादय: भक्तिं विहाय अत्र सन्निवेशिता: तेषां भक्तिरसपरता एव अन्तिमे भवति। जयदेवपद्मावत्यो: प्रणये राधाकृष्णयो: अपूर्वा भक्ति: दृश्यते। विक्रमदेवशर्मण: करुणेऽपि श्रीजगन्नाथं तारातारिण्यौ प्रति भक्ते: पराकाष्ठा प्रदर्श्यते। जयदेवस्य पितु: भोजदेवस्य नौवाणिज्ये भयानकजलचक्रवातेऽपि तस्य माधवभक्ति: वर्ण्यते। तर्कवाचस्पते: अहङ्कारान्तेऽपि भक्तिपरिणति: आकल्यते । अहम्मदवेगस्य वृत्तान्तो भवतु अथवा मालाकारिण्या: तुलस्या:, तन्तुवायस्य वा वृत्तान्तो भवतु सर्वत्र अपूर्वा भक्ति: परिप्रकाशिता भवति । भक्तिरसपरिणतिम् अक्षिलक्षीकृत्य उपन्यासकारेण व्रजमोहनमहान्तिवर्येण अत्र सर्वरसपाकं करोति इति अस्य उपन्यासस्यास्ति वैशिष्ट्यम् ।

**सहायकग्रन्थसूची**


- श्रीमद्भागवतपुराणम् (स्कन्धः — ३, ७, ११), गीताप्रेस, गोरखपुरम्।
- भक्तिरसामृतसिन्धुः — श्रील रूपगोस्वामी, (टीकासहितः), चौखम्बा सुरभारती प्रकाशन, वाराणसी।
- भक्तिरसायनम् — श्रीमन्मधुसूदनसरस्वती, चौखम्बा संस्कृत संस्थान, वाराणसी।
- नारदभक्तिसूत्रम् — गीताप्रेस, गोरखपुरम्।
- शाण्डिल्यभक्तिसूत्रम् — चौखम्बा विद्याभवन, वाराणसी।
- तैत्तिरीयोपनिषद् (ब्रह्मानन्दवल्ली), गीताप्रेस, गोरखपुरम्।
- गीतगोविन्दम् — महाकवि-श्रीजयदेवः, निर्णयसागर प्रेस, मुम्बई।
- ललितलवङ्गलता (संस्कृतोपन्यासः) — प्रो. व्रजमोहन महान्तिः।
- काव्यप्रकाशः — मम्मटभट्टः, चौखम्बा सुरभारती प्रकाशन, वाराणसी।
- साहित्यदर्पणः — कविराज-विश्वनाथः, चौखम्बा संस्कृत सिरीज, वाराणसी।


**पाद टिप्पणी**

[1]श्री.भा. - १०/२०/६

[2]श्री.भा. - १०/२/३७

[3]श्री.भा. - ३/२९/११-१२

[4]ना.भ.सू. - सू.सं.२

[5]शा.भ.सू. - १/२/१.३

[6]भक्तिरसायने - २/११

[7]भ.र.सि. (पू.भा.) - १/११

[8]तैत्तिरीयोपनिषत्

[9]श्री.भा. -७/५/२३